अस्तं याते भीचान् प्रथमे यामे निहन्ति
प्रस्थानि ।
रात्रौ द्वितीययामे पिशाचमङ्गानिपीड़यति ॥
तुरगकारणस्तृतीये विनिहन्त्याद्दुर्यायिनश्चतुर्थे
च ।
भैरवजर्जरशब्दे याः यतस्तां दिशं हन्ति ॥”)
निर्घोषः, पुं, ( निर् + घुष शब्दे + घञ् । ) शब्द-
मात्रम् । इत्यमरः । १ । ६ । २३ ॥ ( यथा,
रघुः । १ । ३६ ।
“स्निग्धगम्भीरनिर्घोषमेकं स्यन्दनमास्थितौ ॥”
निर्गतोऽस्ति घोषो यत्रेति । शब्दशून्ये, त्रि । यथा,
महाभारते । १४ । १९ । ३६ ।
“संनियम्येन्द्रियग्रामं निर्घोषे निर्ज्जने वने ।
कायमभ्यन्तरं कृत्स्नमेकाग्रः परिचिन्तयेत् ॥”)
निर्ज्जनः, त्रि, ( निर्गतो जनो यस्मात् । ) जन-
शून्यस्थानादिः । विजनः । इति विविक्तादिशब्द-
टीकायां सारसुन्दरी ॥ ( यथा, देवीभाग-
वते । २ । ६ । ५८ ।
“एकस्मिन् समये पाण्डुर्माद्रीं दृष्ट्वाथ निर्ज्जने ।
आश्रमे चातिकामार्त्तो जग्राहागतवैभवः ॥”)
निर्ज्जरः, पुं, ( जराया निष्क्रान्तः । निरादयः
क्रान्ताद्यर्थे पञ्चम्या इति समासः । ) देवः ।
इत्यमरः । १ । १ । ७ ॥ ( यथा, देवीभाग-
वते । ५ । ८ । १८ ।
“विश्रान्ता निर्ज्जराः सर्व्वे कुशलं कथयन्तु वः ॥”)
जरारहिते, त्रि । इति मेदिनी । रे, १७३ ॥
सुधायाम्, स्त्री । इति शब्दरत्नावली ॥
निर्ज्जरसर्षपः, पुं, ( निर्ज्जरप्रियः सर्षपः । शाक-
पार्थिववत् समासः । ) देवसर्षपवृक्षः । इति
राजनिर्घण्टः ॥
निर्ज्जरा, स्त्री, (निर्ज्जर + टाप् । ) गुडूची । ताल-
पर्णी । इति मेदिनी । रे, १७३ ॥
निर्ज्जलः, त्रि, ( निर्गतं जलं यस्मात् । ) जलशून्य-
देशादिः । इति सप्तशब्दटीकायां भरतः । २ ।
१ । ५ ॥ यदुक्तम् ।
सम्पाप्ता दशमश्चेन्नायगतिना संरुद्धिता
निर्ज्जले
तुर्य्यद्वादशवह्नितोयमतिमनेकादशाभस्तनी ।
सा षष्ठी वृषपर्व्वमस्य नवमन्तः सप्तमीऽञ्चिता
प्राप्तोऽष्टमवेदनां प्रथम हि तस्यास्तृतीयो भव ॥”
इति वल्लालसेनः ॥
निर्ज्जलैकादशी, स्त्री, ( निर्ज्जला एकादशी । )
ज्यैष्ठमासीयशुक्लैकादशी । यथा, पाद्मे ।
श्रीभीमसेन उवाच ।
“पितामह ! ह्यशक्तोऽहमुपवासे करोमि किम् ।
अतो बहुफलं ब्रूहि व्रतमेकमपि प्रभो ! ॥
श्रीव्यास उवाच ।
वृषस्थे मिथुनस्थेऽर्के शुक्ला ह्येकादशी हि या ।
ज्यैष्ठे मासि प्रयत्नेन सोपोष्या जलवर्ज्जिता ॥
स्नाने चाचमने चैव वर्ज्जयित्वोदकं बुधः ।
उपयुञ्जीत नैवान्यद्व्रतभङ्गोऽन्यथा भवेत् ॥
उदयादुदयं यावद्वर्ज्जयित्वा जलं बुधः ।
अप्रयत्नादवाप्नोति द्वादशद्वादशीफलम् ॥
ततः प्रभाते विमले द्वादश्यां स्नानमाचरेत् ।
जलं सुवर्णं दत्त्वा तु द्विजातिभ्यो यथाविधि ॥
भुञ्जीत कृतकृत्यस्तु ब्राह्मणैः सहितो वशी ।
एवं कृते तु यत् पुण्यं भीमसेन ! शृणुष्व तत् ॥
संवत्सरस्य या मध्ये एकादश्यो भवन्ति हि ।
तासां फलमवाप्नोति पुत्त्र ! मे नात्र संशयः ॥
इति मां केशवः प्राह शङ्खचक्रगदाधरः ॥”
किञ्च ।
“धनधान्यवहा पुण्या पुत्त्रभाग्यसुखप्रदा ।
उपोषिता नरव्याघ्र ! इति सत्यं ब्रवीमि ते ॥
यमदूता महाकायाः कराला कामरूपिणः ।
दण्डपाशधरा रौद्रा नोपसर्पन्ति तं नरम् ॥
पीताम्बरधराः शङ्खचक्रहस्ता मनोजवाः ।
अन्तकाले नयन्त्येनं वैष्णवा वैष्णवीं पुरीम् ॥”
किञ्च ।
“तोयस्य नियमं यस्तु कुरुते वैष्णवोत्तमः ।
पलकोटिसुवर्णस्य यामे यामे स पुण्यभाक् ॥
स्नानं दानं जपं होमं यदस्यां कुरुते नरः ।
तत् सर्व्वञ्चाक्षयं प्राप्नमेतत् कृष्णस्य भाषितम् ॥
किंवापरेण धर्म्मेण निर्ज्जलैकादशीं नृप ! ।
उपोष्य सम्यग्विधिना वैष्णवं पदमाप्नुयात् ॥”
किञ्च ।
“यैः कृता भीमसेनैषा निर्ज्जलैकादशी शुभा ।
स्वकुलं तारितं सर्व्वं कुलातीतं तथा शतम् ॥
आत्मना सह तैर्नीतं वासुदेवस्य मन्दिरे ॥”
किञ्च ।
“आत्मद्रोहः कृतस्तैस्तु यैरेषा नह्युपोषिता ।
पापात्मानो दुराचारा दुष्टास्ते नात्र संशयः ॥”
किञ्च ।
“यश्चेमां शृणुयाद्भक्त्या यश्चापि परिकीर्त्तयेत् ।
उभौ तौ स्वर्गमाप्नौ हि नात्र कार्य्या विचा-
रणा ॥”
अथ निर्ज्जलव्रतविधिः । यथा,—
“यथाप्रागलिखितं कृत्वा सङ्कल्पनियमं व्रते ।
जलमादाय गृह्णीयात्कर्म्मानेन वैष्णवः ॥
एकादश्यां निराहारो वर्ज्जयिष्यामि वै जलम् ।
केशवप्रीणनार्थाय अत्यन्तदमनेन च ॥” इति ॥
“वर्ज्जयेच्चाम्बुहोरात्रं विना चाचमनार्थकम् ।
विना च प्राशनं पादोदकस्यात्मपावनम् ॥
एकादश्यां निशायान्तु नित्यपूजां विधाय हि ।
हैमीं त्रैविक्रमीं मूर्त्तिं स्नापयेत् पयआदिभिः ॥
वस्त्रादिकं समर्प्याथाभ्यर्च्य गन्धादिभिश्च ताम् ।
प्रणम्य जागरं कुर्य्यात् तदग्रे नर्त्तनादिना ॥
प्रातः स्नानादि निर्व्वर्त्य तं त्रिविक्रममर्च्चयेत् ।
शुक्लाम्बुकुम्भान् विप्रेभ्यो दद्यात् गन्धाद्यल-
ङ्कृतान् ॥”
तत्र मन्त्रः ।
“देवदेव हृषीकेश संसारार्णवतारक ! ।
जलकुम्भप्रदानेन यास्यामि परमाङ्गतिमिति ॥
दद्याच्च कनकं छत्रं वस्त्रयुग्मसुपानहौ ।
जलपात्राणि दिव्यानि विभवे सति वैष्णवः ॥
शुक्त्या विप्रान् भोजयित्वा पीत्वा चाष्टकरा-
ञ्जलम् ।
स्वयं वाग्यतो मौनी सन् भुञ्जीत सह बन्धुभिः ॥”
इति श्रीहरिभक्तिविलासे १५ विलासः ॥
निर्ज्जितः, त्रि, ( निर् + जि जये + क्तः । ) प्राप्त-
पराजयः । तत्पर्य्यायः । पराजितः २ परा-
भूतः ३ विजितः ४ जितः ५ । इति शब्दरत्ना-
वली ॥ वशीकृतः । यथा,—
“ध्यायत् बरणाम्भोजं भावनिर्ज्जितचेतसा ।”
इति श्रीभागवते ।१।६। अध्यायटीकायां स्वामी ॥
निर्ज्जितेन्द्रियग्रामः, त्रि, ( निर्ज्जितः पराजित
इन्द्रियग्राम इन्द्रियसमूहो येन ।) यतिः । इत्य-
मरः । २ । ७ । ४४ ॥
निर्ज्जीवः, त्रि, (निर्गतो जीवो जीवात्मा यस्मात् ।)
जीवात्मरहितः । प्राणिशून्यः । यथा,—
“चिता चिन्ता द्वयोर्मध्ये चिन्ता एव गरीयसी ।
चिता दहति निर्ज्जीवं चिन्ता दहति जीवितम् ॥”
इति प्राञ्चः ॥
निर्झरः, पुं, ( निर्झृणाति जीर्णोभवति उच्च-
स्थानपतनादिति । निर् + झॄ + अच् ।) पर्व्वता-
वतीर्णजलप्रवाहः । इति भरतः ॥ गत्वा
अन्यथा वा गिरौ जलप्रवाहः । इति मधुः ॥
पर्व्वतादेशेन पतज्जलं झोरा इति ख्यातम् ।
इति कोकटः ॥ तत्पर्य्यायः । झरः २ । इत्य-
मरः । २।३।५ ॥ निर्झरी ३ । इति शब्दरत्ना-
वली ॥ ( यथा, महाभारते । ३ । ६४ । ८ ।
“सरितो निर्झरांश्चैव ददर्शाद्भुतदर्शनान् ॥”)
तज्जलगुणाः । लघुत्वम् । पथ्यत्वम् । दीपन-
त्वम् । कफनाशित्वञ्च । इति राजवल्लभः ॥*॥
( यथा च ।
“शैलसानुस्रवद्वारि प्रवाहे निर्झरो झरः ।
स तु प्रस्रवणश्चापि तज्जलं नैर्झरं जलम् ॥
नैर्झरं रुचिकृच्चोरं कफघ्नं दीपनं लघु ।
मधुरं कटुपाकञ्च वातं स्यादतिपित्तलम् ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)
सूर्य्यघोटकः । तुषानलः । इति मेदिनी रे, १७४ ॥
निर्झरी, स्त्री, ( निर्झृणाति उच्चस्थानपातात्
जीर्णोभवतीति । निर् + झॄ + अच् । गौरादि-
त्वात् ङीप् । ) निर्झरः । इति शब्दरत्नावली ॥
(निर्झर उत्पत्तिकारणत्वेनास्त्यस्या इति । अच् ।
ङीप् ।) नदी । यथा,—
“जटाकटाहसम्भ्रमभ्रमन्निलिम्पनिर्झरी-
विलोलवीचिवल्लरीविराजमानमूर्द्धनि ।
धगद्धगद्धगज्ज्वलल्ललाटपट्टपावके
किशोरचन्द्रशेखरे रतिः प्रतिक्षणं मम ॥”
इति रावणकृतशिवस्तोत्रम् ॥
निर्झरी, [ न् ] पुं ( निर्झरोऽस्त्यस्येति । निर्झर
+ इनिः । ) पर्व्वतः । इति त्रिकाण्डशेषः ॥
निर्झरिणी, स्त्री, ( निर्झर उत्पत्तिकारणत्वेना-
स्त्यस्या इति । इनिः । ङीप् । ) नदी । इति
त्रिकाण्डशेषः ॥ ( यथा, कथासरित्सागरे ।
१० । ७ ।